(इष्टसाधनत्वनिर्णयादिः
१ धर्मितावच्छेद

श्रीगणेशाय नमः ॥ सव्यभिचारगादाधर्यां ॥ सामान्यज्ञानस्य विशेषजिज्ञासायां इष्टसाधनतावच्छेदकधर्मविषयकज्ञानसंपादकत
या हेतुत्वमित्युक्तं । तत्रेत्थं क्रमः । सामान्यधर्मावान्तरधर्मप्रकारकज्ञाने मदिष्टसाधनं इति निरुक्तज्ञानत्वविशिष्टे इष्टसाधनता
वैशिष्ट्यावगाहिबुद्धिं प्रति निरुक्तज्ञानत्वप्रकारकनिरुक्तज्ञानविशेष्यकज्ञानस्य हेतुत्वं । एकविशिष्टेऽपरवैशिष्ट्यावगाहिबुद्धौ विशे
षणतावच्छेदकप्रकारकविशेष्यज्ञानस्य हेतुत्वात् । तच्च ज्ञानं विशिष्टसंव्याप्यतारूपावान्तरत्वशरीरनिविष्टसामानाधिकरण्यं
तःपातिनः सामान्यविशिष्टाधिकरणस्य वृत्तित्वांशे नादृश्यसामानाधिकरण्यनिविष्टे निरूपितत्वरूपवैशिष्ट्यावगाहि । तत्र विशे
षणतावच्छेदकधर्मप्रकारं ज्ञानविधया सामान्यधर्मप्रकारकज्ञानस्य कारणत्वं । विशिष्टस्य वैशिष्ट्यावगाहिबुद्धौ विशेषणता
वच्छेदकप्रकारकविशेषणज्ञानस्य कारणत्वात् । तथा च सामान्यधर्मप्रकारकज्ञाने सत्येव इष्टसाधनताधर्मितावच्छेदकी भू
तं यत्सामान्यधर्मावान्तरधर्मप्रकारकज्ञानत्वं तत्प्रकारकं निरुक्तज्ञानविशेष्यकं यत्ज्ञानं तत्संपत्तिर्भवति नान्यथेति तादृश
ज्ञानसंपादकतया सामान्यज्ञानस्य हेतुत्वमिति गादाधरीनिरुक्तपंक्त्यर्थः ॥ श्रीः ॥ मणौ उभयपक्षवृत्तित्वमिति साधारण
मात्रसंगतं लक्षणं । तस्यान्ययोरभावेनाननुगमः । उभयपक्षव्यावृत्तत्वमिति असाधारणमात्रे समन्वितं । तस्य साधारणा
द्वावभावेनाननुगमः । इदमुपलक्षणं । केवलान्वयि धर्मव्यापकधर्मिताकसाध्यसंदेहनिरूपितविषयतावद्वृत्तित्वं मूः इदञ्चा

(२ साध्यवद्वृत्तित्वे सति साध्याभाववद्वृत्तित्वं =
उभयपक्षव्यावृत्तत्वम् = २

(विशेष्यतारूपा = १

६ नित्यत्वतदभावविषयकज्ञानवायमित्याकारकः

तद्धर्मिविशेष्यक ५

नुपसंहारिमात्रसंयाहकमित्यननुगमो द्रष्टव्यः ॥ श्रीः ॥ साध्यसंदेहेत्यादि यथाश्रुतमूलादिति प्रभातिप्रबंधे नित्यत्वतदभावविषय
कज्ञानं वानयमिति ज्ञानस्य नित्यत्वतदभावरूपकोटिद्वयोपस्थापकत्वमुक्तं । तच्चायुक्तं । एकसंबंधिज्ञानमपरसंबंधिस्मारकं तथा च नि
रूकज्ञानं वानयमिति ज्ञानं एकसंबंधि । नित्यत्वस्य तदभावस्य च स्वविषयकत्वरूपसंसर्गेणालि । यज्ज्ञानं तद्विषयकमिदं भवति तद
परसंबंधिनः । नित्यत्वस्य तदभावस्य स्मारकं भवतीति क्रमेण ॥ छ ॥ साध्यसंदेहजनकत्वमुक्तं निरुक्तज्ञानस्य तद्दित्थं यद्धर्मिवि
षयकं संज्ञायो भवति धर्मितावच्छेदकीभूततद्धर्मप्रकारकज्ञानस्य तादृशानि संज्ञायं प्रतिजनकत्वात् । प्रकृते नित्यत्वतदभावावि
षयकसंज्ञायं प्रति तादृशज्ञानस्य धर्मितावच्छेदकप्रकारकज्ञानविधया कारणत्वमिति ॥ श्रीः ॥ साधारणधर्मवद्धर्मिज्ञानजन्य
कोटिद्वयोपस्थितेः ॥ असाधारणधर्मवद्धर्मिज्ञानजन्यकोटिद्वयोपस्थितेः । विप्रतिपत्तिवाक्यजन्यकोटिद्वयोपस्थितेश्च । संज्ञा
यं प्रति हेतुत्वं । तथा च यथाश्रुतसाध्यसंदेहजनकेत्यादिलक्षणस्य समन्वयप्रकारः । तथा च साध्यसंदेहजनकं कोटिद्वयोपस्थिति
जनकं च यत्पक्षधर्मताज्ञानं तद्दीयविषयत्वाश्रयत्वमिति । तथा च उक्तव्यंसत्त्वात् धूमवान्वह्नेरित्यादौ सत्येव वह्नौ च साधारणे सम
न्वयं विद्धि । साध्यसंदेहोद्देश्यकत्वं नवेत्याकारकसत्त्वजनकत्वे पक्षधर्मताज्ञानस्यापि । तथा हि । द्रव्यत्वे वह्निद्रव्यत्वाभाववद्वृत्तिसत्तावद्द्रव्यमिति
साधारणधर्मवद्धर्मिज्ञानं भवति द्रव्यमेव पक्षधर्मताज्ञानं अस्य कोटिद्वयोपस्थितिद्वारा निरुक्तसंज्ञायजनकत्वं । कोटिद्वयोपस्थापकत्वं चास्ति को
टिद्वयं द्रव्यत्वतदभावरूपं तद्विषयित्वाऽ ७

= तद्वद्वृत्तित्वे सति तदभाववद्वृत्तित्वमसाधारण्यं = ५

स्मृतिस्मज्ज्ञानकत्वं तस्येत्यर्थं एकसंबंधिज्ञानमपरसंबंधिस्मारकं प्रकृते संबंधः सामानाधिकरण्यरूपः प्रकृते पक्षसंबंधावगाहिज्ञानं सत्ता रूपैकसंबंध
संबंधिनौ कोटिभूतौ स्मारयतीति तथा चैवं कोटिद्वयोपस्थितौ सत्यां द्रव्यत्वं नवेति संशयः एवं साध्यसंदेहजनकं कोटिद्वयोपस्थापकं यत्तादृशपक्ष

स्मृतिः

हेरंबः

तादृशजनकतासामानाधिकरण्येन तादृशजन्यतायां वह्निसहचरितघटाभावसहचरितजलत्ववान् पर्वत इत्येतादृशज्ञानजन्यत्व-
न्ति घटाभावे ऽपस्थितत्वं तत्र भावे ऽपि ज्ञेयं । तत्रोपस्थितत्वं तत्सहकारेण साध्यसंदेहजनकत्वं घटाभावसहचरितजलत्ववानयमिति ज्ञानवै-
शिष्ट्यावच्छिन्नजन्यत्वं चास्तीति · न देव जन्यत्वं वह्न्यभाववद्घटाभावसहचरितजलत्ववानयमिति ज्ञाननिष्ठजनकतानिरूपितं ज-
न्यतावच्छेदकधर्मस्य घटाभावसहचरितजलत्ववत्ताज्ञानवैशिष्ट्यरूपस्यात्र तत्र चाविशेषात् · न चात्र साध्यविशेषणकोपस्थि-
तिसाध्यसंदेहजनकतावच्छेदकपर्याप्तावच्छेदकताकत्वस्य जन्यतायां निवेशे ऽपि घटाभावसाहचर्याद्यवच्छिन्नप्रकारताशालिज्ञानवैशिष्ट्या-
वच्छिन्नजन्यतायां तादृशसाध्यसंदेहजनकतावच्छेदकीभूतवह्निसाहचर्यावच्छिन्नप्रकारताशालिज्ञानवैशिष्ट्यरूपधर्मपर्याप्तावच्छेद-
कत्वविरहेण तादृशजन्यतानिरूपितजनकतावच्छेदकतायाश्च वह्न्यभावाद्यवच्छिन्नप्रकारताया असत्त्वेनातिप्रसंगवारणसंभवे तत्र
व्याप्यत्वादिरूपनियतत्वनिवेशो ऽकिंचित्कर इति वाच्यं । तादृशजनकतावच्छेदकपर्याप्तावच्छेदकताकत्वं च तादृशजनकतावच्छेदकघट-
केतरानवच्छिन्नत्वं । तस्य स्वविषयितान्यापकविषयिताकत्वरूपघटकत्वादिप्रवेशेन गौरवात् एतद्रूपेणैव नियतत्वं च सल्लघुशरीर-
तया तदनुसरणात् · तादृशजन्यतायां निरुक्तविशेषणाक्रांततया तत्रैवातिप्रसंगतादवस्थ्याच्च · निरुक्तविशेषणाक्रांतत्वं चेत्थं हेतं
घटाभाववह्निसहचरितजलत्ववत्ताज्ञाने जन्योपस्थितौ तादृशावच्छेदकघटकेतरानवच्छिन्ना जन्यता वह्निसाहचर्यावच्छिन्नप्रकारताक-
ज्ञानवैशिष्ट्यावच्छिन्ने वा घटाभावसाहचर्यावच्छिन्नप्रकारताकज्ञानवैशिष्ट्यावच्छिन्नजन्यतायामपि निरुक्तवैशिष्ट्यावच्छिन्नत्वात् ·
तस्या अवच्छेदे तादृशजन्यतावच्छेदकत्वेन निरुक्तजन्यतावच्छेदकीभूतनिरुक्तवैशिष्ट्यस्यैव नियामकत्वात् · ॥ छ॥ जनकतावच्छेदकीभूतनिरुक्त १
चरे

=व्याप्यं ३

॥असाधारणे वह्निमान् गगनादित्यादौ लक्षणसमन्वयप्रकारः पक्षे तादृशज्ञानस्य वह्निमद्वृत्तित्वाभाववद्वृत्तिगगनत्वानुपपन्नतद्व्याकारकस्य
असाधारणधर्मवद्धर्मिज्ञानविधया साध्यसंदेहजनकत्वं कोटिद्वयोपस्थापकत्वं चेत्संभवति तद्विषयत्वस्य गगनरूपहेतौ सत्त्वाल्लक्षणसमन्वयः
अथ साध्य[illegible] प्रकारकत्वाभाववद्विशिष्टोपस्थितिवृत्तिर्या साध्यसंदेहत्वन्यूनवृत्तिजन्यतानिरूपिता जनकता तन्नियतं यज्जन्यत्वं तन्नि
रूपितजनकतावच्छेदिका सती साध्याविशेषणकोपस्थितिवृत्तिर्या तादृशजन्यतानिरूपितजनकता तन्नियतं जन्यत्वं तन्निरूपितजन
कतावच्छेदिका या प्रकारता तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपे परिष्कारे साध्यसंदेहजनकतायां तादृशोपस्थितिवृत्तित्वांतं वि
शेषणमनर्थमिति चेन्न। पर्वतो वह्निमान् जलत्वादित्यादौ जलत्वरूपे विरुद्धेऽतिव्याप्तेः वह्निसमानाधिकरणजलत्ववान्पर्वत इति ज्ञानजन्याया
[illegible] विषयिण्याः साध्याप्रकारिकाया उपस्थितेरवर्त्तमानेन साध्यसंदेहजनकतानियतजन्यतानिरूपितजनकतावच्छेदकप्रकारतायाः वन्हिसमा
नाधिकरणविषयकोपस्थितिनिष्ठसाध्यसंदेहजनकतामादाय तादृशजनकतानियतजन्यतानिरूपितजनकतावच्छेदकत्वेन तादृशप्रकारतावच्छे
दकतापर्याप्त्याश्रयधर्मवत्त्वस्य तत्र सत्त्वात्। तदुपादाने चोक्तदिशाऽतिव्याप्तिवारणात्। न च तत्रैवोपस्थितौ साध्याविशेषणकत्वमनर्थमि
ति [illegible]मितव्यं। निरुक्तस्थले मोक्तदिशैवातिप्रसंगतादवस्थ्यात्। ननूक्तलक्षणे प्रथमजनकतानियतत्वस्थाने तादृशजनकतासामानाधि
करणस्य जन्यतायां निवेशेनैव सामंजस्ये तत्र तन्नियतत्वप्रवेशोऽनर्थक इति चेन्न। निरुक्तजलत्वरूपविरोधात्यतिव्याप्तेः प्रसंगात्। वन्ह्य
भावसहचरितघटाभावसहचरितजलत्ववान्पर्वत इत्याकारकज्ञानीयप्रकारताव्यक्तेः। साध्याविशेषणकोपस्थितिवृत्तिसाध्यसंदेह
जनकतानियतजन्यतानिरूपितजनकतावच्छेदिकायाः साध्याविशेषणकोपस्थितिसाध्यसंदेहजनकतौ [illegible] जन्यतानिरूपितजनके

वृत्ति १ समानाधिकरण १

नि॰रु॰ पं॰ ७

न च साध्यसंदेहनिरूपितत्वादेर्जनकतायां प्रवेशे निरर्थक इति वाच्यं । जलत्वादिरूपविरुद्धहेतावतिव्याप्तेः । ननूत्तरदले साध्यसंदेहसंदेहजनक-
तायां तादृशोपस्थितित्ववृत्तित्वविशेषणं व्यर्थमिति चेन्न । वह्निमान्धूमादित्यादौ धूमादिरूपव्याप्येऽतिव्याप्तेः । वह्निसंचरितवह्न्यभावका-
लीनधूमवान्पर्वत इति ज्ञानीयप्रकारताव्यक्तेः साध्याविशेषणकोपस्थितिवृत्तिसाध्यसंदेहजनकतानियतजन्यतानिरूपितजनकता-
यामवच्छेदिकाया साध्योपस्थितिनिष्ठजनकतामादाय साध्यसंदेहजनकतानियतजन्यतानिरूपितजनकतायामवच्छेदकीभूतायाः
परवच्छेदकतापर्याप्त्यधिकरणं तद्धत्वस्य धूमे सत्त्वात् । अत उपस्थितित्ववृत्तित्वस्य जनकतायां निवेशेऽपि पुनरुक्तदोषतादवस्थ्यमतः साध्या-
विशेषणकोपस्थितित्ववृत्तित्वनिवेशः । न चात्र जन्यतायां तादृशजनकतायानियतत्वस्थाने सामानाधिकरण्यनिवेशे नैवोपपत्तौ नियत-
त्वस्य गुरोर्निवेशोऽकिंचित्कर इति वाच्यं । वह्निसहचरितपटाभाववत्सहचरितधूमवानयमिति ज्ञाने विषयीभूतप्रकारताव्यक्तिमादाय
निरुक्तव्याप्येऽतिव्याप्तितादवस्थ्यात् । साध्यसंशयजनकतासामानाधिकरण्यं चेज्जन्यतायां वह्न्यभावपटाभावसमानाधिकरणधू-
मवानयमिति ज्ञानजन्योपस्थित्यंतर्भावेण कृष्णमिति पूर्वोपदिष्टादिकं । न च वंशकंपे साध्यसंशये निरूपितत्वादेर्जनकतादिविशेषणत्व-
मप्रयोजनकमिति । निरुक्तव्याप्येऽतिप्रसंगभंगरूपप्रयोजनसत्त्वात् ॥ इति व्यावृत्तनयः कथिता अकथिताश्च सुधीभिरूह्या इत्यलं ॥
॥श्रीः॥

हेरंबः
३